द्वितीयः पाठः

# सङ्घे शक्तिः

## (कृदन्त-प्रयोग)

(आधुनिक युग की सबसे बड़ी समस्या लोगों में परस्पर अविश्वास, लोभ तथा महत्त्वाकांक्षा की है जिसके कारण परिवार, समाज इत्यादि संस्थाओं का बहुत तेजी से विघटन हो रहा है। लोग संघ की शक्ति की उपेक्षा करके व्यक्तिवाद को बढ़ावा दे रहे हैं । इससे परिवार, समाज तथा राष्ट्र तक की सत्ता सन्देह में पड़ गयी है । प्रस्तुत पाठ में एक प्रसिद्ध लोककथा के द्वारा संघ अर्थात् मिलजुल कर रहने की महत्ता पर प्रकाश डाला गया है ।)



अस्ति गङ्गायाः [illegible] तीरे पुष्कलनामको ग्रामः । तत्र बहुधनसम्पन्नः हरिहरो नाम कृषिकः । कृषिकर्मणा तेन प्रभूता सम्पत्तिरर्जिता । ग्रामे तत्परिसरे च तेन महती प्रतिष्ठा सम्प्राप्ता । तस्य चत्वारः पुत्राः अभवन् । पितुः कार्ये सहायतां नाकुर्वन्, प्रत्युत परस्परं नित्यं कलहायन्ते । एकः कथयति – त्वामेव पिता अधिकं मन्यते । त्वमेव तस्य विपुलां सम्पत्तिं प्राप्स्यसि । अपरः वदति – त्वम् अतीव अलसः । कदापि किमपि हितकरम् उपयोगि कार्यं न करोषि । तृतीयः तथैव विद्याध्ययनस्य निन्दां करोति, चतुर्थः विद्याध्ययनाय पितुः धनयाचनां करोति तदा तृतीयः पितरं वारयति । एवमेव किमपि

समाश्रित्य चतुर्षु भ्रातृषु कलहः प्रवर्तते स्म । अनेन बुद्धिमान् पिता सततं चिन्तितस्तिष्ठति ।



वृद्धः पिता स्वपुत्रान् कृषिकर्मणः सञ्चा[illegible] किन्तु सर्वेऽपि अलसाः न शृण्वन्ति । एकदा स वा[illegible] शय्यासीनो जातः । स कलहायमानेषु पुत्रेषु सङ्घ[illegible]नाय उपायमचिन्तयत्। सर्वानपि पुत्रानाहूय स एकस्मै सुबद्धं द[illegible] दत्वा प्राह – त्वमेनं भञ्जय । स कथमपि भङ्क्तुं नाशक्नोत् । [illegible] पुत्रः तथैव आदिष्टः ।



सोऽपि तद् दण्डचतुष्टयं भङ्क्तुं न समर्थो जातः । इत्थमेव दशा अपरयोरपि

पुत्रयोरभवत् । तदा वृद्धः पिता दण्डचतुष्टयं निर्बध्य एकैकं दण्डम् एकैकस्मै पुत्राय दत्तवान् । किञ्च तं दण्डं त्रोटयितुं पुनः आदिष्टवान् । सर्वे पुत्राः स्व-स्व हस्तस्थं दण्डं भङ्क्तुं समर्थाः जाताः । तदा पिता कथितवान् - पुत्राः ! एवमेव बुध्यध्वम् । यदि यूयं पृथक्-पृथक् तिष्ठथ, तदा कश्चित् शत्रुः युष्मान् एकैकान् विनाशयिष्यति । यदि पुनः यूयं सर्वे मिलित्वा सुबद्धाः तिष्ठथ, तदा कोऽपि बाह्यजनः युष्मान् विनाशयितुं न समर्थः । अयमुपदेशः - संहतिः श्रेयसी पुंसाम् ।

तस्माद् दिवसात् प्रभृति सर्वेऽपि चत्वारः पुत्राः स्व-स्व दुष्टविचारान् त्यक्त्वा परस्परं मेलनेन गृहेऽवर्तन्त पितुश्च सेवया तम् अरोगं कृतवन्तः ।

**शब्दार्थः**

| | | |
|---|---|---|
| **रमणीये** | = | सुन्दर (सप्तमी विभक्ति) |
| **ग्रामः** | = | गाँव |
| **तत्र** | = | वहाँ |
| **बहुधनसम्पन्नः** | = | अधिक सम्पत्ति से युक्त, धनी |
| **कृषिकः** | = | किसान |
| **प्रभूता** | = | बहुत, पर्याप्त |
| **सम्पत्तिः** | = | धन |
| **अर्जिता** | = | कमायी गयी |
| **परिसरे** | = | प्रांगण में/ आस-पास |
| **महती** | = | बहुत, बड़ी |
| **सम्प्राप्ता** | = | प्राप्त हुई |
| **चत्वारः** | = | चार |

| | | |
|---|---|---|
| अभवन् | = | हुए |
| अकुर्वन् | = | किये |
| प्रत्युत | = | अपितु, बल्कि |
| परस्परम् | = | आपस में |
| कलहायन्ते | = | लड़ते हैं |
| अपरम् | = | दूसरे को |
| कथयति | = | कहता है |
| त्वाम् | = | तुम्हें |
| एव | = | ही |
| मन्यते | = | मानते हैं |
| विपुलाम् | = | बहुत |
| प्राप्स्यसि | = | पाओगे |
| अतीव | = | बहुत |
| अलसः | = | आलसी |
| किमपि | = | कुछ भी |
| हितकरम् | = | भला |
| करोषि | = | करते हो |
| तथैव | = | वैसे ही |
| धनयाचनाम् | = | धन की मांग |

WEBCOPY: NOT TO BE PUBLISHED

| | | |
|---|---|---|
| तदा | = | तब |
| पितरम् | = | पिता को |
| वारयति | = | रोकता है, मना करता है |
| एवम् | = | इस प्रकार |
| समाश्रित्य | = | आश्रय लेकर |
| कलहः | = | लड़ाई |
| प्रवर्तते स्म | = | होती थी |
| सततम् | = | लगातार |
| तिष्ठति | = | रहता है |
| कृषिकर्मणः | = | खेती के काम के |
| सञ्चालनाय | = | करने के लिए |
| भूयो भूयः | = | बार-बार |
| प्रेरयति | = | प्रेरित करता है |
| शृण्वन्ति | = | सुनते हैं |
| एकदा | = | एक बार |
| वार्धक्यजनितेन | = | बुढ़ापे से उत्पन्न |
| शय्यासीनः | = | बिछावन पर लेटा हुआ |
| जातः | = | हुआ |

| | | |
|---|---|---|
| सङ्घबद्धतायाः | = | मिलकर रहने के |
| बोधनाय | = | समझने के लिए |
| अचिंन्तयत् | = | सोचा, विचार किया |
| आहूय | = | बुलाकर |
| सुबद्धम् | = | अच्छी तरह बंधा हुआ |
| दण्डचतुष्टयम् | = | चार दण्डों को (दण्डम् = डण्डा) |
| दत्वा | = | देकर |
| प्राह | = | कहा |
| एनम् | = | इसको, इसे |
| भञ्जय | = | तोड़ो |
| भङ्क्तुम् | = | तोड़ने के लिए / में |
| नाशक्नोत् | = | (न + अशक्नोत्) समर्थ नहीं हुआ |
| तदा | = | तब |
| आदिष्टः | = | आदेश दिया गया |
| निर्बध्य | = | बन्धनरहित करके, खोलकर |
| एकैकम् | = | एक-एक को |
| दत्तवान् | = | दिया |
| त्रोटयितुम् | = | तोड़ने के लिए |
| किञ्च | = | तदनन्तर |

| | | |
|---|---|---|
| **पुनः** | = | फिर |
| **आदिष्टवान्** | = | आदेश दिया |
| **हस्तस्थम्** | = | हाथ में स्थित, हाथ में रहने वाले |
| **बुध्यध्वम्** | = | तुमलोग समझो |
| **तिष्ठथ** | = | रहते हो |
| **कश्चित्** | = | कोई |
| **एकैकान्** | = | एक-एक को |
| **विनाशयिष्यति** | = | नष्ट कर देगा |
| **मिलित्वा** | = | मिलकर |
| **बाह्यजनः** | = | बाहरी मनुष्य |
| **विनाशयितुम्** | = | नष्ट करने के लिए / में |
| **संहतिः** | = | एकता |
| **श्रेयसी** | = | अधिक अच्छी |
| **पुंसाम्** | = | मनुष्यों का/की/ के |
| **प्रभृति** | = | से लेकर, इत्यादि |
| **सर्वे** | = | सभी |
| **त्यक्त्वा** | = | छोड़कर |
| **परस्परम्** | = | आपस में |
| **मेलनेन** | = | मेल-मिलाप से |

| | | |
|---|---|---|
| अवर्तन्त | = | थे, रहते थे |
| अरोगम् | = | रोगरहित |
| कृतवन्तः | = | किये |

## व्याकरणम्

### सन्धिविच्छेदः पदविच्छेदश्च

| | | |
|---|---|---|
| सम्पत्तिरर्जिता | = | सम्पत्तिः + अर्जिता (विसर्ग–सन्धिः) |
| त्वामेव | = | त्वाम् + एव |
| त्वमेव | = | त्वम् + एव |
| किमपि | = | किम् + अपि |
| कदापि | = | कदा + अपि (दीर्घ – सन्धिः) |
| तथैव | = | तथा + एव (वृद्धि – सन्धिः) |
| विद्याध्ययनस्य | = | विद्या + अध्ययनस्य (दीर्घ–सन्धिः) |
| एवमेव | = | एवम् + एव |
| चिन्तितस्तिष्ठति | = | चिन्तितः + तिष्ठति (विसर्ग–सन्धिः) |
| सर्वेऽपि | = | सर्वे + अपि (पूर्वरूप–एकादेशः) |
| कथमपि | = | कथम् + अपि |
| सोऽपि | = | सः + अपि (विसर्ग–सन्धिः) |
| इयमेव | = | इयम् + एव |
| अपरयोरपि | = | अपरयोः + अपि (विसर्ग– सन्धिः) |

| | | |
|---|---|---|
| पुत्रयोरभवत् | = | पुत्रयो: + अभवत् (विसर्ग-सन्धि:) |
| एकैकम् | = | एक + एकम् (वृद्धि-सन्धि:) |
| किञ्च | = | किम् + च (व्यञ्जन-सन्धि:) |
| कश्चित् | = | क: + चित् (विसर्ग-सन्धि:) |
| कोऽपि | = | क: + अपि (विसर्ग-सन्धि:) |
| अयमुपदेश: | = | अयम् + उपदेश: |
| गृहेऽवर्तन्त | = | गृहे + अवर्तन्त (पूर्वरूप-सन्धि:) |
| पितुश्च | = | पितु: + च (विसर्ग-सन्धि:) |

## प्रकृति-प्रत्यय-विभाग:

| | | |
|---|---|---|
| अर्जिता | = | + क्त, स्त्रीलिङ्गम्, एकवचनम् |
| सम्प्राप्ता | = | सम् + प्र + + क्त, स्त्री०, एकवचनम् |
| | | √अर्ज् |
| कलहायन्ते | = | कलह + क्यङ्, प्रथमपुरुष:, बहुवचनम् |
| | | √आप् |
| अकुर्वन् | = | लङ्लकार:, प्रथमपुरुष:, बहुवचनम् |
| मन्यते | = | लट्लकार:, प्रथमपुरुष:, एकवचनम् |
| | | √कृ |
| प्राप्स्यसि | = | प्र लृट्लकार:, मध्यमपुरुष:, एकवचनम् |
| | | √मन् |
| जात: | = | + क्त |
| | | √आप् |
| समाश्रित्य | = | सम् + आ + श्रि + ल्यप् |
| | | √जन् |
| प्रवर्तते | = | प्र + लट्लकार:, प्रथमपुरुष:, एकवचनम् |
| | | √ |

तिष्ठति = लट्लकारः, प्रथमपुरुषः, एकवचनम्

√वृत्

प्रेरयति = प्र + + णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

√स्था

शृण्वन्ति = लट्लकारः, प्रथमपुरुषः, बहुवचनम्

√ईर्

अचिन्तयत् = णिच्, लङ्लकारः, प्रथमपुरुषः, एकवचनम्

√श्रु

आहूय = आ + ह्वे + ल्यप्

दत्त्वा = √चिन्त् + क्त्वा

आदिष्टः = आ + √दिश् + क्त

√दा

भञ्जय = भञ्ज् लोट्लकारः, मध्यमपुरुषः, एकवचनम्

अशक्नोत् = लङ्लकारः, प्रथमपुरुषः, एकवचनम्

√

## अभ्यासः

√शक्

### मौखिकः

**1. निम्नलिखितानां शब्दानाम् उच्चारणं कुरुत –**

कृषिकर्मणा, सम्पत्तिरर्जिता, समाश्रित्य, चिन्तितस्तिष्ठति, शृण्वन्ति, दण्डचतुष्टयम्, एकैकस्मै, सर्वेऽपि, गृहेऽवर्तन्त ।

**2. 'सङ्घे शक्तिः भवति'** – इति विषयम् आश्रित्य संस्कृतभाषायां द्वे वाक्ये वदत ।

**3. निम्नलिखितानां शब्दानाम् अर्थं वदत –**

तथैव, विपुलाम्, कदापि, एवमेव, सततम्, एकदा, कथमपि, तदा, किञ्च ।

### लिखितः

**4. वाक्यनिर्माणं कुरुत –**

पितरम्, ग्रामः, कृषिकः, करोषि, एकदा, पिता, त्यक्त्वा ।

## 5. सन्धिविच्छेदं कुरुत –

तथैव, चिन्तितस्तिष्ठति, सर्वेऽपि, सोऽपि, सम्पत्तिरर्जिता ।

## 6. मञ्जूषातः शब्दं चित्वा रिक्तस्थानानि पूरयत –

संहतिः, गङ्गायाः, चत्वारः, ग्रामे, शृण्वन्ति, कृषिकः

(क) अस्ति ………………………… तीरे पुष्कलनामको ग्रामः ।

(ख) तत्र बहुधनसम्पन्नः हरिहरो नाम ………………………… ।

(ग) ………………………… तेन महती प्रतिष्ठा सम्प्राप्ता ।

(घ) तस्य ………………………… पुत्राः अभवन् ।

(ङ) सर्वेऽपि अलसाः न ………………………… ।

(च) ………………………… श्रेयसी पुंसाम् ।

## 7. प्रकृति-प्रत्यय-विभागं कुरुत –

दत्त्वा, जातः, समाश्रित्य, आहूय, आदिष्टः ।

## 8. अधोलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत –

(क) पुष्कलनामको ग्रामः कुत्र अस्ति ?

(ख) कृषिकर्मणा केन प्रभूता सम्पत्तिरर्जिता ?

(ग) हरिहरस्य कति पुत्राः आसन् ?

(घ) के अति अलसाः आसन् ?

(ङ) सर्वे पुत्राः सेवया कम् अरोगं कृतवन्तः ?

## 9. सुमेलनं कुरुत –

| अ | आ |
|---|---|

(क) दत्वा (1) + क्त

(ख) ग्रस्तः (2) आ + + क्त

(ग) त्रोटयितुम् (3) √ग्रस् + तुमुन्

(घ) भङ्क्तुम् (4) + क्त्वा √दिश्

(ङ) मिलित्वा (5) √भञ्ज् + णिच् + तुमुन्

(च) आदिष्टः (6) √मिल् + क्त्वा

**10. उदाहरणानुसारम् अव्ययपदानि चिनुत –** √त्रुट्

**यथा** – सः अद्य पाटलिपुत्रं गच्छति – √दा अद्य

(क) त्वम् अत्र किं करोषि ? – ………………… ।

(ख) सः कदा गृहं गमिष्यति ? – ………………… ।

(ग) शीला करीना वा चित्रं द्रक्ष्यति?– ………………… ।

(घ) असत्यं मा वद । ………………… ।

(ङ) शकीलेन साकं सः अगच्छत् । ………………… ।

**11. अधोलिखितानां निर्देशानुसारं रूपाणि लिखत –**

**यथा** – मातृ (द्वितीया – एकवचने) – मातरम् ।

(क) पुत्र (सप्तमी – एकवचने) – ………… ।

(ख) फल (षष्ठी – बहुवचने) – ………… ।

(ग) नदी (चतुर्थी – द्विवचने) – ………… ।

(घ) लता (सप्तमी – बहुवचने)– ………… ।

(ङ) युष्मद् (पञ्चमी – द्विवचने) – ………… ।

## 12. अधोलिखित-वाक्यानि घटनाक्रमानुसारं लिखत -

(क) तत्र हरिहरो नाम कृषिकः वर्तते ।

(ख) एकदा हरिहरः रोगग्रस्तः अभवत् ।

(ग) गङ्गायाः तीरे पुष्कलनामको ग्रामः अस्ति ।

(घ) हरिहरस्य चत्वारः पुत्राः आसन् ।

(ङ) सर्वे पुत्राः अतीव अलसाः आसन् ।

(च) हरिहरः पुत्रान् आहूय अवदत् ।

(छ) सर्वे पुत्राः दुष्टविचारान् अत्यजन् ।

## 13. मञ्जूषायाः उचितानि पदानि योजयित्वा वाक्यनिर्माणं कुरुत -

| | | |
|---|---|---|
| सः | | गच्छतः |
| त्वम् | | गच्छामि |
| अहम् | | गच्छन्ति |
| ते | | गच्छसि |
| वयम् | गृहम् | गच्छामः |
| यूयम् | | गच्छथ |
| तौ | | गच्छति |
| आवाम् | | गच्छावः |

## योग्यताविस्तार

समाज के इतिहास में दो प्रकार की धारणाएँ सदा से रही हैं- व्यक्तिवाद तथा समाजवाद। इसे प्राचीन संस्कृत साहित्य में स्वहित और परहित (परोपकार) के रूप में

वर्णित किया गया है। व्यक्तिवाद अर्थात् केवल स्वहित स्वाभाविक मनोवृत्ति है। सभी लोग अपने हित को सबसे बढ़कर मानते हैं किन्तु ऐसी मनोवृत्ति अन्ततः सामाजिक प्रक्रिया के विकास में हानिकारक होती है । इसीलिए परोपकार या परहित की कामना पर संस्कृत के प्राचीन लेखक बहुत मुखर रहे हैं। पुराणों के विषय में यह श्लोक कहा गया है –

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ।।

अर्थात् सभी पुराणों का यही सार है कि परोपकार व्यक्ति का आत्यन्तिक हित करता है और दूसरों को कष्ट देना बहुत बड़ा अपराध है । इसी प्रकार एक अन्य श्लोक है–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।

ये सारे वचन स्वहित के परित्याग एवं परहित की भद्रकामना के अन्तर्गत संघबद्धता की दिशा में व्यक्ति को प्रेरित करते हैं । आदिम युग में व्यक्तिवाद चलता हो किन्तु सभ्य सुसंस्कृत समाज परस्पर सहयोग के बिना नहीं चल सकता। संघ से ही परिवार, समाज, राज्य – ये सारी संस्थाएँ चलती हैं । पञ्चतन्त्र में कहा गया है –

असंहताः विनश्यन्ति, संहतिः कार्यसाधिका ।

अर्थात् जो लोग बिखर कर रहते हैं वे नष्ट हो जाते हैं (Degeneration destroys)। दूसरी ओर संघबद्ध होने से अर्थात् मिलजुल कर कार्य करने से कार्य की सिद्धि होती है । वैदिक साहित्य से लेकर आधुनिक युग तक के संस्कृत लेखक संघ की शक्ति को रेखाङ्कित करते रहे हैं ।

विगत एक सौ वर्षों से पाश्चात्त्य जगत् में समाजवाद (Socialism) की

अवधारणा बहुत महत्त्वपूर्ण हो गयी है। इसमें व्यक्ति को समाज का अविभाज्य अङ्ग माना गया है । एक व्यक्ति को समाज वह सब-कुछ प्रदान करे जो उसके जीवन-यापन के लिए आवश्यक है किन्तु उस व्यक्ति से भी समाज यह आशा करता है कि वह अपनी शक्तिभर समाज के लिए शारीरिक या बौद्धिक श्रम करे जिससे समाज की उन्नति हो (From each according to his capacity, to each according to his needs)। यही अवधारणा प्राचीन भारत की आश्रमव्यवस्था में भी थी जिसमें अवस्था के अनुरूप व्यक्ति स्वहित और परहित दोनों के लिए श्रम करता था। सम्यक् श्रम को ही ''आश्रम'' कहा गया था।

QQQ